(यथा, बृहत्संहितायाम् । १०५ । १३ ।
"यावन्नक्षत्रमाला विचरति गगने भूषयन्तीह भासा
तावन्नक्षत्रभूतो विचरति सह तैर्ब्रह्मणोऽन्तोऽवशेषम् ॥")

नक्षत्रेशः, पुं, (नक्षत्राणामीशः ।) चन्द्रः । (यथा, साहित्यदर्पणे । २ । २० ।
"नक्षत्रेशकृतेक्षणो गिरिगुरोर्गाढ़ां रुचिं धारयन्
गामाक्रम्य विभूतिभूषिततनू राजत्युमा-वल्लभः ॥")
कर्पूरः । इत्यमरः । २ । ६ । १३० ॥

नख, सर्पणे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) प्रणखति । इति दुर्गादासः ॥

नखं, क्ली, पुं, (नह्यते इव शरीरे । नह बन्धे + "नहेर्हलोपश्च ।" उणां ५ । २३ । इति खः हलोपश्च ।) अङ्गुलीकण्टकः । नह इति हिन्दी भाषा । तत्तु उपधातुविशेषः गर्भस्थबालकस्य षष्ठमासे भवति । इति सुखबोधः ॥ तत्पर्य्यायः । पुनर्भवः २ कररुहः ३ नखरः ४ इत्यमरः । २ । ६ । ८३ ॥ कामाङ्कुशः ५ करजः ६ पाणिजः ७ अङ्गुलीसम्भूतः ८ पुनर्नवः ९ इति राजनिर्घण्टः ॥ कराग्रजः १० करकण्टकः ११ स्मराङ्कुशः १२ रतिरथः १३ करचन्द्रः १४ कराङ्कुशः १५ । इति शब्दरत्नावली ॥ * ॥ रतिक्रीड़ायां नखाघातस्थानानि यथा,—
"नखाघातः प्रदातव्यो यथास्थानानि कर्म्मसु ।
पार्श्वयोः स्तनयोश्चैव ऊरौ चैव नितम्बके ॥
कचस्थले च कर्णान्ते कपाले बाहुमूलके ।
ग्रीवायां कण्ठदेशे च नखाघातं समाचरेत् ॥
तथा सर्व्वशरीरेषु नखं दद्यात् शनैः शनैः ॥"
इति कामशास्त्रम् ॥
"न नखैर्विलिखेद्भूमिं गाश्च संवेशयेन्नहि ।
न स्नाङ्गे नखवाद्यं वै कुर्य्यान्नाञ्जलिना पिबेत् ॥"
इति कूर्म्मे उपविभागे १५ अध्यायः ॥

नखं, क्ली, स्त्री, (नखमिव आकृतिरस्त्यस्येति । अच् ।) नखीनामगन्धद्रव्यम् । नखी इति ख्यातः । तत्पर्य्यायः । शुक्तिः २ शङ्खः ३ खुरः ४ कोलदलम् ५ । इत्यमरः । २ । ४ । १३० ॥ करजाख्यः ६ अश्वखुरः ७ नखः ८ व्याघ्रनखः ९ नखी १० ।
"द्विधा शङ्खनखाख्योऽन्यः शङ्खाख्यो वदरीच्छदः ।"
इति रत्नमालायाम् । १४४ ॥
कररुहः ११ सिल्ही १२ शफः १३ चलः १४ कोशी १५ करजः १६ हनुः १७ नागहनुः १८ पाणिजः १९ वदरीपत्रः २० ह्रस्यः २१ पण्यविलासिनी २२ सन्धिनालः २३ पाणिरुहः २४ । इति राजनिर्घण्टः ॥ व्याघ्रायुधम् २५ चक्रकारकम् २६ शङ्खनखः २७ नखरी २८ । इति शब्दरत्नावली ॥ अपि च । अथ नखनखीगन्धद्रव्यम् ।
"नखं व्याघ्रनखं व्याघ्रायुधं तच्चक्रकारकम् ।
नखं खल्यं नखी प्रोक्ता हनुर्हट्टविलासिनी ॥
नखद्वयं ग्रहश्लेष्मवातास्रज्वरकुष्ठहृत् ।
लघूष्णं शुक्रलं वर्ण्यं स्वादुव्रणविषापहम् ॥
अलक्ष्मीमुखदौर्गन्ध्यं हृत्पाकरसयोः कटु ॥"
इति भावप्रकाशः ॥
खल्यनखस्य पर्य्यायः । नखी १ हनुः २ हट्टविलासिनी ३ । तयोर्गुणाः । ग्रहश्लेष्मवातास्रज्वरकुष्ठनाशित्वम् । लघुत्वम् । उष्णत्वम् । शुक्रलत्वम् । वर्ण्यत्वम् । स्वादुत्वम् । व्रणविषालक्ष्मीमुखदौर्गन्ध्यनाशित्वम् । पाकरसयोः कटुत्वञ्च । इति भावप्रकाशः ॥ कण्डूभूतविनाशित्वम् । इति राजनिर्घण्टः ॥ रुचोन्नत्वम् । इति राजवल्लभः ॥ * ॥
"शैलरुहं व्याघ्रनखं हनुहट्टविलासिनी ।
शुषिराञ्जनकेशी च कपोताङ्घ्रिर्नली खुरः ॥
स्वल्पपत्रस्त्वसौ शुक्तिर्नखरी वदरीच्छदा ।
महांस्त्वसौ शङ्खनखः शङ्खाख्यो गन्धसारणः ॥"
इति भरतधृतवाचस्पतिः ॥

नखः, पुं, (नह्यतेऽनेनेति । नह + खः । हस्य लोपः ।) खण्डम् । इति हेमचन्द्रः । ३ । २५८ ॥ (नखीनामगन्धद्रव्यम् । इति राजनिर्घण्टः ॥)

नखकुट्टः, पुं, (नखं कुट्टयति छिनत्तीति । कुट्ट + अण् ।) नापितः । इति त्रिकाण्डशेषः ॥

नखनिष्पावः, पुं, (नखं निष्पवते फलसादृश्येन अनुकरोतीति । निर् + पू + अच् । यद्वा, नखवत् निष्पावः शिम्बी यस्य ।) निष्पावीभेदः । तत्पर्य्यायः । अङ्गुलिफला २ हस्तनिष्पाविका ३ ग्राम्या ४ नखगुच्छफला ५ ग्रामजनिष्पावी ६ नखफलिनी ७ । अस्या गुणाः । कषायत्वम् । मधुरत्वम् । कण्ठशुद्धिकरत्वम् । मेध्यत्वम् । दीपनत्वम् । रुचिकारित्वञ्च । इति राजनिर्घण्टः ॥

नखपर्णी, स्त्री, (नख इव पर्णमस्याः । ङीष् ।) वृश्चिकाख्यक्षुपः । इति राजनिर्घण्टः ॥

नखपुष्पी, स्त्री, (नख इव पुष्पमस्याः । ङीष् ।) पृक्का । इति राजनिर्घण्टः ॥

नखमुचं, क्ली, (नखं मुचतीति । मुच + "कप्रकरणे मूलविभुजादिभ्य उपसंख्यानम् ।" ३ । २ । ५ । इत्यस्य वार्त्तिकोक्त्या कः ।) धनुः । इति संक्षिप्तसारव्याकरणम् ॥ नखस्य मोचके, त्रि ॥

नखरः, पुं, क्ली, (नखं रातीति । रा + कः ।) नखः । इत्यमरः । २ । ६ । ८३ ॥ (यथा, साहित्यदर्पणे ।
"किं पुनरलङ्कृतस्त्वं सम्प्रति नखरक्षतैस्तस्याः ॥"
अस्त्रविशेषः । यथा, महाभारते ।७।२६।१७।
"सकम्पनर्ष्टिनखरा मुषलानि परश्वधाः ॥"
तथा, तत्रैव । ६ । १८ । १७ ।
"पादाताश्चाग्रतोऽगच्छन् धनुश्चर्म्मासिपाणयः ।
अनेकशतसाहस्रा नखरप्रासयोधिनः ॥")

नखरञ्जनी, स्त्री, (रज्यतेऽनयेति । रञ्ज + ल्युट् । ङीप् । नखस्य रञ्जनी ।) नखच्छेदनास्त्रविशेषः । नरुण इति भाषा । यथा,—
"अनन्तचरणोपान्तचारिणी मलहारिणी ।
पुनर्भवच्छेदकरी गङ्गेव नखरञ्जनी ॥"
इति द्व्यर्थोद्भटः ॥

नखरायुधः, पुं, (नखरमेव आयुधं यस्य ।) सिंहः । व्याघ्रः । कुक्कुटः । इति राजनिर्घण्टः ॥

नखराह्वः, पुं, (नखरं आह्वयते स्पर्द्धते इति । आ + ह्वे + कः ।) करवीरवृक्षः । इति राजनिर्घण्टः ॥

नखरी, स्त्री, (नखरः आकृतिसादृश्येनास्त्यस्या इति । अच् । गौरादित्वात् ङीष् ।) नखी । इति शब्दमाला ॥ क्षुद्रनखी । इति काचिद्रत्नमाला ॥

नखवृक्षः, पुं, (नख सर्पणे + अच् । नखो वृक्षः । इति नित्यकर्म्मधारयः ।) नीलवृक्षः । इति राजनिर्घण्टः ॥ (नीलवृक्षशब्देऽस्य विवरणं ज्ञातव्यम् ॥)

नखशङ्खः, पुं, (नख इव शङ्खः ।) क्षुद्रशङ्खः । इति शब्दरत्नावली ॥

नखाङ्कं, क्ली, (नखमिव अङ्कं यस्य ।) व्याघ्रनखी । इति शब्दरत्नावली ॥

नखाङ्गं, क्ली, (नखस्य अङ्गमिव अङ्गं यस्य ।) नखी । इति काचिद्रत्नमाला ॥

नखायुधः, पुं, (नखमेव आयुधं यस्य ।) व्याघ्रः । इति राजनिर्घण्टः ॥ सिंहकुक्कुटौ च ॥

नखालिः, पुं, (नखमिव अलतीति । अल पर्य्याप्तौ + इन् ।) क्षुद्रशङ्खः । इति शब्दचन्द्रिका ॥ (नखस्य आलिः ।) नखश्रेणी च ॥

नखाशुः, पुं, (नखतीति । नख सर्पणे + आशुच् ।) नीलवृक्षः । इति राजनिर्घण्टः ॥

नखाशी, [न्] पुं, (नखमश्नातीति । अश भोजने + णिनिः ।) पेचकः । इति त्रिकाण्डशेषः ॥ नखभक्षकमात्रे, त्रि ॥

नखी, स्त्री, (नख + गौरादित्वात् ङीष् ।) नखनामगन्धद्रव्यम् । इत्यमरः । २ । ४ । १३० ॥ (अस्याः पर्य्यायो यथा, वैद्यकरत्नमालायाम् ।
"करजाख्यश्चाश्वखुरो नखो व्याघ्रनखो नखी ॥")

नखी, [न्] पुं, (नखमस्त्यस्येति । नख + इनिः ।) सिंहः । इति राजनिर्घण्टः ॥ विदारकाद्यमनखयुक्तपशुमात्रम् । यथा, चाणक्ये । २७ ।
"नखिनाञ्च नदीनाञ्च शृङ्गिणां शस्त्रपाणिनाम् ।
विश्वासो नैव कर्त्तव्यः स्त्रीषु राजकुलेषु च ॥"

नगः, पुं, (न गच्छतीति । न + गम् + डः । यद्वा, दह्यते इति । दह + "दहेर्गो लोपो दश्च नः ।" उणां ।५।६१। इति गः । धातोरन्त्यलोपः । दस्य च नः ।) पर्व्वतः । (यथा, कुमारे । ७ । ७२ ।
"नवे दुकूले च नगोपनीतं
प्रत्यग्रहीत् सर्व्वममन्त्रवर्ज्जम् ॥")
वृक्षः । इत्यमरः । ३ । ३ । १६ ॥ (यथा, महाभारते । १ । ४३ । ६ ।
"तं दग्ध्वा स नगं नागः कश्यपं पुनरब्रवीत् ।
कुरु यत्नं द्विजश्रेष्ठ ! जीवयैनं वनस्पतिम् ॥"
स्थावरमात्रम् । यथा, विष्णुपुराणे । १ । ५ । ६ ।
"मुख्या नगा यतश्चोक्ता मुख्यसर्गस्ततस्त्वयम् ।"
"नगाः स्थावराः ।" इति तट्टीकायां स्वामी ॥)